# shrIhanumadaShTottarashatanAmastotram 2

# શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રમ્ ૨

## Document Information

Text title : Hanumat Ashtottarashatanama Stotram 2

File name : hanumadaShTottarashatanAmastotram2.itx

Category : hanumaana, aShTottarashatanAma, stotra

Location : doc_hanumaana

Transliterated by : Shri Devi Kumar, refined by PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : From Hanumatstutimanjari, See corresponding nAmAvaliH

Acknowledge-Permission: Mahaperiyaval Trust

Latest update : April 24, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 24, 2024

*sanskritdocuments.org*

# શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રમ્ ૨

(પાઞ્ચરાત્રાગમતઃ)

ૐ રામદાસાગ્રણીઃ શ્રીમાન્ હનૂમાન્ પવનાત્મજઃ ।
આઞ્જનેયઃ કપિશ્રેષ્ઠઃ કેસરીપ્રિયનન્દનઃ ॥ ૧॥

આરોપિતાંસયુગલરામરામાનુજઃ સુધીઃ ।
સુગ્રીવસચિવો વાલિજિતસુગ્રીવમાલ્યદઃ ॥ ૨॥

રામોપકારવિસ્મર્તૃસુગ્રીવસુમતિપ્રદઃ ।
સુગ્રીવસત્પક્ષપાતી રામકાર્યસુસાધકઃ ॥ ૩॥

મૈનાકાશ્લેષકૃન્નાગજનનીજીવનપ્રદઃ ।
સર્વદેવસ્તુતઃ સર્વદેવાનન્દવિવર્ધનઃ ॥ ૪॥

છાયાન્ત્રમાલાધારી ચ છાયાગ્રહવિભેદકઃ ।
સુમેરુસુમહાકાયો ગોષ્પદીકૃતવારિધિઃ ॥

બિડાલસદૃશાકારસ્તપ્તતામ્રસમાનનઃ ।
લઙ્કાનિભઞ્જનઃ સીતારામમુદ્રાઙ્ગુલીયદઃ ॥ ૬॥

રામચેષ્ટાનુસારેણ ચેષ્ટાકૃદ્વિશ્વમઙ્ગલઃ ।
શ્રીરામહૃદયાભિજ્ઞો નિઃશેષસુરપૂજિતઃ ॥ ૭॥

અશોકવનસઞ્છેત્તા શિંશુપાવૃક્ષરક્ષકઃ ।
સર્વરક્ષોવિનાશાર્થં કૃતકોલાહલધ્વનિઃ ॥ ૮॥

તલપ્રહારતઃ ક્ષુણ્ણબહુકોટિનિશાચરઃ ।
પુચ્છઘાતવિનિષ્પિષ્ટબહુકોટિનરાશનઃ ॥ ૯॥

જમ્બુમાલ્યન્તકઃ સર્વલોકાન્તરસુતઃ કપિઃ ।
સ્વદેહપ્રાપ્તપિષ્ટાઙ્ગદુર્ધર્ષાભિધરાક્ષસઃ ॥ ૧૦॥

તલચૂર્ણિતયૂપાક્ષો વિરૂપાક્ષનિબર્હણઃ ।

સુરાન્તરાત્મનઃ પુત્રો ભાસકર્ણવિનાશકઃ ॥ ૧૧॥

અદ્રિશૃઙ્ગવિનિષ્પિષ્ટપ્રઘસાભિધરાક્ષસઃ ।
દશાસ્યમન્ત્રિપુત્રઘ્નઃ પોથિતાક્ષકુમારકઃ ॥ ૧૨॥

સુવઞ્ચિતેન્દ્રજિન્મુક્તનાનાશસ્ત્રાસ્ત્રવૃષ્ટિકઃ ।
ઇન્દ્રશત્રુવિનિર્મુક્તશસ્ત્રાચાલ્યસુવિગ્રહઃ ॥ ૧૩॥

સુખેચ્છયેન્દ્રજિન્મુક્તબ્રહ્માસ્ત્રવશગઃ કૃતી ।
તૃણીકૃતેન્દ્રજિત્પૂર્વમહારાક્ષસયૂથપઃ ॥ ૧૪॥

રામવિક્રમસત્સિન્ધુસ્તોત્રકોપિતરાવણઃ ।
સ્વપુચ્છવહ્નિનિર્દગ્ધલઙ્કાલઙ્કાપુરેશ્વરઃ ॥ ૧૫॥

વહ્ન્યનિર્દગ્ધાચ્છપુચ્છઃ પુનર્લઙ્ઘિતવારિધિઃ ।
જલદૈવતસૂનુશ્ચ સર્વવાનરપૂજિતઃ ॥ ૧૬॥

સન્તુષ્ટઃકપિભિઃ સાર્ધં સુગ્રીવમધુભક્ષકઃ ।
રામપાદાર્પિતશ્રીમચ્ચૂડામણિરનાકુલઃ ॥ ૧૭॥

ભક્ત્યાકૃતાનેકરામપ્રણામો વાયુનન્દનઃ ।
રામાલિઙ્ગનતુષ્ટાઙ્ગો રામપ્રાણપ્રિયઃ શુચિઃ ॥ ૧૮॥

રામપાદૈકનિરતવિભીષણપરિગ્રહઃ ।
વિભીષણશ્રિયઃ કર્તા રામલાલિતનીતિમાન્ ॥ ૧૯॥

વિદ્રાવિતેન્દ્રશત્રુશ્ચ લક્ષ્મણૈકયશઃપ્રદઃ ।
શિલાપ્રહારનિષ્પિષ્ટધૂમ્રાક્ષરથસારથિઃ ॥ ૨૦॥

ગિરિશૃઙ્ગવિનિષ્પિષ્ટધૂમ્રાક્ષો બલવારિધિઃ ।
અકમ્પનપ્રાણહર્તા પૂર્ણવિજ્ઞાનચિદ્ઘનઃ ॥ ૨૧॥

રણાધ્વરે કણ્ઠરોધમારિતૈકનિકુમ્ભકઃ ।
નરાન્તકરથચ્છેત્તા દેવાન્તકવિનાશકઃ ॥ ૨૨॥

મત્તાખ્યરાક્ષસચ્છેત્તા યુદ્ધોન્મત્તનિકૃન્તનઃ ।
ત્રિશિરોધનુષશ્છેત્તા ત્રિશિરઃખડ્ગભઞ્જનઃ ॥ ૨૩॥

ત્રિશિરોરથસંહારી ત્રિશિરસ્ત્રિશિરોહરઃ ।
રાવણોરસિ નિષ્પિષ્ટમુષ્ટિર્દૈત્યભયઙ્કરઃ ॥ ૨૪॥

વજ્રકલ્પમહામુષ્ટિઘાતચૂર્ણિતરાવણઃ ।
અશેષભુવનાધારો લક્ષ્મણોદ્ધરણક્ષમઃ ॥ ૨૫॥

સુગ્રીવપ્રાણરક્ષાર્થં મક્ષિકોપમવિગ્રહઃ ।
કુમ્ભકર્ણત્રિશૂલૈકસઞ્છેત્તા વિષ્ણુભક્તિમાન્ ॥ ૨૬॥

નાગાસ્ત્રાસ્પૃષ્ટસદ્દેહઃ કુમ્ભકર્ણવિમોહકઃ ।
શસ્ત્રાસ્ત્રાસ્પૃષ્ટસદ્દેહઃ સુજ્ઞાની રામસમ્મતઃ ॥ ૨૭॥

અશેષકપિરક્ષાર્થમાનીતૌષધિપર્વતઃ ।
સ્વશક્ત્યા લક્ષ્મણોદ્ધર્તા લક્ષ્મણોજ્જીવનપ્રદઃ ॥ ૨૮॥

લક્ષ્મણપ્રાણરક્ષાર્થમાનીતૌષધિપર્વતઃ ।
તપઃકૃશાઙ્ગભરતે રામાગમનશંસકઃ ॥ ૨૯॥

રામસ્તુતસ્વમહિમા સદા સન્દૃષ્ટરાઘવઃ ।
રામચ્છત્રધરો દેવો વેદાન્તપરિનિષ્ઠિતઃ ॥ ૩૦॥

મૂલરામાયણસુધાસમુદ્રસ્નાનતત્પરઃ ।
બદરીષણ્ડમધ્યસ્થનારાયણનિષેવકઃ ॥ ૩૧॥

ઇત્યેતચ્છ્રીહનૂમતો નામનમષ્ટોત્તરં શતમ્ ।
પઠતાં શ૱ૃણ્વતાં ચૈવ નિત્યમભ્યસતાં સતામ્ ॥ ૩૨॥

અનન્તપુણ્યફલદં મહાપાતકનાશનમ્ ।
મહારોગપ્રશમનં મહાદુઃખવિનાશનમ્ ॥ ૩૩॥

દુસ્તરાપત્પ્રશમનં તાપત્રયવિનાશનમ્ ।
રામક્રોધાદિશમનં બાહ્યશત્રુવિનાશનમ્ ॥ ૩૪॥

અનાદ્યજ્ઞાનશમનં સંસારભયનાશનમ્ ।
મહાબન્ધહરં સમ્યક્ કર્મબન્ધનિકૃન્તનમ્ ॥ ૩૫॥

વાદે વિજયદં નિત્યં રણે શત્રુવિનાશનમ્ ।
ધનધાન્યપ્રદં સમ્યક્ પુત્રપૌત્રપ્રવર્ધનમ્ ॥ ૩૬॥

કિમત્ર બહુનોક્તેન મોક્ષૈકફલદં સતામ્ ।
પૂર્ણાનુગ્રહતો વિષ્ણોર્યો વાયુર્મોક્ષદઃ સતામ્ ॥

તસ્ય સ્તોત્રસ્ય માહાત્મ્યં કોऽપિ વર્ણયિતું ક્ષમઃ ।
શ્રુતિસ્મૃતિપુરાણાનિ ભારતાદ્યુક્તયસ્તથા ॥ ૩૮॥

અસ્મિન્નર્થે પ્રમાણાનિ સત્યં સત્યં વદામ્યહમ્ ।
સત્યં સત્યં પુનઃ સત્યં નાત્ર કાર્યા વિચારણા ॥ ૩૯॥

(પાઞ્ચરાત્રાગમતઃ)

ઇતિ શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail

---

*shrIhanumadaShTottarashatanAmastotram 2*
pdf was typeset on August 24, 2024

Please send corrections to *sanskrit@cheerful.com*